दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्दः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् आश्विन्शुक्लनवमी
आश्विन १५ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-336 | 1 | अक्तूबर, 01 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 १५०० कोटिरूप्यकाणि कदा प्राप्स्यन्ते इति भाजपा वदेत्, एकः नेता एकं वचनं वदति, द्वितीयः अन्यत्-मुख्यमंत्रीसुखविन्दरसिंहसुक्खुः

3 ओडिशाप्रदेशे ३ वर्षेषु २२०० गोदावरीशमिश्रनाम्ना आदर्शविद्यालयाः भवीष्यन्ति

4 "आयुर्वेदेन निरामयजीवनम्"इति शीर्षकमुपेत्य वेदविभागेन एकदिवसीया सङ्गोष्ठी समायोजिता

## निर्वाचनायोगेन बिहार-विधानसभा निर्वाचनेभ्यः प्राक् अन्तिमा मतदाता-सूचिः प्रकाशिता

हिमसंस्कृतवार्ताः - निर्वाचनायोगेन बिहारे विशेष-गहन-पुनरीक्षणस्य अन्तर्गतम् अन्तिमा मतदाता सूचिः प्रकाशिता। इयं निर्वाचनायोगस्य आधिकारिके वेबसाइट इति अन्तर्जाल पटले उपलब्धा अस्ति। बिहारस्य मुख्य-निर्वाचनाधिकारी कार्यालयस्य अनुसारं मतदातासूचेः प्रतयः समेभ्यः जनपद-निर्वाचनाधिकारिभ्यः सह-जनपदाधिकारिभ्यः च प्रदास्यन्ते।

## सिन्दूराभियानावधौ भारतीय-सशस्त्रबलानां परस्पर-सञ्चालन-क्षमतया ऐक्यभावनया च महत्वपूर्णा भूमिका - रक्षामन्त्री राजनाथसिंहः



हिमसंस्कृतवार्ताः - रक्षामन्त्री राजनाथ सिंहः अवोचत् यत् भारतीय-सशस्त्र बलानां मध्ये परस्परं सञ्चालनक्षमता ऐक्यं च वर्तमान-समये सफल सञ्चालनस्य आवश्यकता जायेते। राजधान्यां नव-दिल्ल्याम् सैन्यत्रयस्य संगोष्ठीं सम्बोधयन् श्रीसिंहः एतत् अवोचत्। तेनोक्तं यत् एकविंश्यां शताब्द्याम् अपायाः संवर्धिताः। श्रीसिंहेनोक्तं यत् भूमिः समुद्रः वायुः अन्तरिक्षः साइबरस्पेस इत्येते परस्परं गहनतया सम्पृक्ताः। रक्षामन्त्री अवदत् यत् ऑपरेशन सिंदूर इति अभियानस्य अवधौ भारतेन स्वीय वायुरक्षा-ऐक्ये बृहत्तरं प्रदर्शनं कृतम्। यत् निर्णायक सञ्जातम्। यतोहि भारतीयसेना जगतः सर्वोत्तमा सेना वर्तते। रक्षामन्त्री एकीकृत-सञ्चालनस्य अस्मिन् युगे निरीक्षण-लेखा परीक्षा-प्रणाल्योः परस्परं निर्वाध-रूपेण संयोजने बलं प्रदत्तम्। अपि च उक्तं यत् साइबर-सूचना-युद्धस्य मानकानाम् ऐक्यस्य आवश्यकता वर्तते।

## भारतेन गाजा सङ्घर्ष-समाप्तेः अमरीकायाः योजनायाः स्वागतं कृतम्। प्रधानमन्त्रिणा नरेन्द्र-मोदिना अयं शान्त्यै व्यवहार्य-मार्गः उक्तः



हिमसंस्कृतवार्ताः - भारतेन गाजा सङ्घर्षं समापयितुम् एकस्याः व्यापक-योजनायाः अमरीकाय-राष्ट्रपतेः डॉनाल्ड ट्रम्पस्य घोषणायाः स्वागतं कृतम्। सामाजिकसञ्चारपटले प्रधानमन्त्रिणा नरेन्द्र-मोदिना उक्तं यत् इयं योजना फिलिस्तीन इज़राइल-देशयोः नागरिकैः सह पश्चिम एशिया-क्षेत्राय च दीर्घकालिक-स्थायी-शांति-सुरक्षा-विकासनां व्यवहार्य-मार्गं प्रददाति। प्रधानमन्त्रिणा आशा प्रकटिता यत् समेपि सम्बद्ध पक्षं राष्ट्रपतेः ट्रम्पस्य पदक्षेपाय एकमत्यं भविष्यन्ति। अमुं सङ्घर्षं समापयितुं शान्ति सुनश्च तुम् अस्य प्रयासस्य समर्थन करिष्यन्ति। भारते इस्राइल-देशस्य राजदूतन रूवेन अज़ार इत्यनेन गाजा इत्यत्र सङ्घर्षं समापनोद्देश्यळेन अमरीकायाः नेतृत्वयुतायाः शान्ति योजनायाः समर्थनाय प्रधानमन्त्रिणः नरेन्द्र मोदिनः आभारः प्रकटितः

## वियतनाम-देशे बुआलोई-चक्रवातेन मृतकानां संख्या षड्विंशतिः अभवत्



हिमसंस्कृतवार्ताः - वियतनाम-देशे बुआलोई-चक्रवातेन मृतकानां संख्या षड्विंशतिः अभवत्। अस्मिन् चक्रवाते अष्टासीतिः जनाः आहताः। द्विंशतिः जनाः च विलुप्ताः सन्ति। चक्रवात् कारणेन पञ्चाशताधिक-एकलक्ष-गृहाणि प्रध्वंसितानि। वियतनाम देशस्य प्रधानमंत्री स्थानीय प्रशासन निर्दिष्वान् यत् आवश्यक सुरक्षा-कार्याणि कुर्यात् तेन शैक्षणिक-संस्थानां चिकित्सा सौविध्यानाम् च पुनः संचालनाय प्रशासनं निर्दिष्टम् तेन शोक-संतप्त जनान् प्रति संवदेनाः प्रकटिताः ।

## एकीकृतपेंशनयोजनायाः (यूपीएस) विकल्पं स्वीकर्तुं अन्तिमातिथिः ३० नवम्बरपर्यन्तं वर्धिता

एकीकृतपेंशनयोजनायाः (यूपीएस) विकल्पं कर्तुं मृतानां पूर्वनिवृत्तानां पात्रविद्यमानकर्मचारिणां, पूर्वनिवृत्तानां, अधिनियमरूपेण विवाहितपत्न्याः च अन्तिमतिथिं ३० नवम्बर् यावत् वर्धिता अस्ति। पूर्वं अन्तिमतिथिः गतदिने एव आसीत् । वित्तमन्त्रालयेन विज्ञप्तौ उक्तं यत् यूपीएस-अन्तर्गतं अद्यतनकाले अनेकानि सकारात्मकपरिवर्तनानि घोषितानि सन्ति, यथा स्विचविकल्पः, त्यागपत्रे लाभः, अनिवार्यनिवृत्तिः, करमुक्तिः च। मन्त्रालयेन उक्तं यत् एतान् परिवर्तनान् दृष्ट्वा कर्मचारिभ्यः विकल्पं कर्तुं किञ्चित् अधिकं समयं दातव्यमिति विभिन्नेभ्यः हितधारकेभ्यः अनुरोधाः प्राप्ताः।

## सुभाषितम्

**यथा ह्येकेन चक्रेण,**
**न रथस्य गतिर्भवेत्।**
**एवं परुषकारेण,**
**विना दैवं न सिद्ध्यति।।**

अर्थात्- जैसे एक पहिए से रथ नहीं चल सकता। ठीक उसी प्रकार बिना पुरुषार्थ के भाग्य सिद्ध नहीं हो सकता है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं
7876636263
Watsapp संख्या मध्ये नमो नमः लिखन्तु
To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## तमिलनाडुराज्यस्य पोन्नेरी-नगरस्य समीपे एनोर्-ताप-विद्युत्-संस्थाने निर्माणाधीनस्य भवनस्य पतनेन नव श्रमिकाः मृताः



तमिलनाडुराज्यस्य पोन्नेरी-नगरस्य समीपे एनोर्-ताप-विद्युत्-संस्थाने निर्माणाधीनस्य भवनस्य पतनेन नव श्रमिकाः मृताः, अन्ये च अनेके घातिताः श्रमिकाः ३० पादपर्यन्तम् ऊर्ध्वतः पतिताः। गतसायंकाले तेषां समुचितसुरक्षासाधनं विना कार्यं कुर्वन्तः एव दुर्घटना अभवत्। घातितानां स्टैन्ले-सर्वकारिये-चिकित्सालये प्रवेशः कृतः अस्ति ।

# १५०० कोटिरूप्यकाणि कदा प्राप्स्यन्ते इति भाजपा वदेत्, एकः नेता एकं वचनं वदति, द्वितीयः अन्यत्- मुख्यमंत्रीसुखविन्दरसिंहसुक्खुः

**हिमसंस्कृतवार्ताः- शिमला।** लन्दन-यात्रातः प्रत्यागत्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः भाजपापक्षे वाक्प्रहारं कृतवान्। प्रधानमन्त्रिणा घोषितानि १५०० कोटिरूप्यकाणि कदा प्राप्स्यन्ति इति भाजपा वदेत् इति मुख्यमन्त्री अवदत्। यदा हिमाचलप्रदेशः आपदः पीडितः, प्रभावितः च भवति तदा तत्क्षणमेव एतत् वित्तपोषणं मुक्तं कर्तव्यम्। भाजपायाः पार्श्वे विषयः नास्ति। कदाचित् शौचालयकरस्य विषये कथयति, कदाचित् अन्यत् किमपि वदति।



सोमवासरे शिमलानगरे पत्रकारैः सह सम्भाषणं कुर्वन् सुक्खुः अवदत् यत् विपक्षः वज्रचूर्णस्य उपरि करं आरोपयितुं वदति। करः न स्थापितः। करम् आरोपयितुं भिन्नः विषयः अस्ति। भाजपा पञ्चसु समूहेषु विभक्ता अस्ति। एकः नेता एकं वदति, अन्यः अन्यत्। जीएसटी-कारणात् राज्यस्य महती पीडा अभवत्। २०१७ तमे वर्षे यदा जीएसटी-प्रवर्तनं जातम् तदा बद्दी, नालागढं, पर्यटनक्षेत्रम् इत्यादिषु क्षेत्रेषु ₹४,००० कोटिरूप्यकाणां वैट अथवा आबकारीकरः प्राप्यते स्म। जीएसटी-प्रवर्तनानन्तरं केवलं १५० कोटिरूप्यकाणि एव प्राप्यन्ते। २०१७ तमे वर्षे यदा वैटहानिः अभवत् तदा प्रतिवर्षं ₹३,२०० कोटिरूप्यकाणां जीएसटी-क्षतिपूर्तिः प्रदत्ता भविष्यति इति घोषितम्। २०२२ तमस्य वर्षस्य जूनमासे यदा भाजपा सत्तायां आसीत् तदा जीएसटी-क्षतिपूर्तिः निरस्तः अभवत्। सीमेण्ट- उद्योगेन सर्वाधिकं जीएसटी-राजस्वं प्राप्तम्।

## स्वपुत्र्याः प्रवेशार्थं लन्दनं गतः तत्र राजनीतिः न कर्तव्या; अहमपि पिता अस्मि- मुख्यमंत्री

सुक्खुः अहमपि कन्यायाः पिता इति उक्तवान्। तस्य कन्या प्रवेशार्थं तेन सह गन्तुं प्रार्थितवती। सः लन्दने अपि हिमाचलस्य हितानां विषये निरन्तरं पक्षमुपस्थापितम्। सः नित्यं मुख्यसचिवेन अन्यैः अधिकारिभिः सह वदति स्म, मन्त्रिभिः सह अपि वदति स्म। भाजपया एतादृशी राजनीतिः न कर्तव्या। विमानटिकटसहितं सर्वः व्ययः तेन स्वकोषात् कृतं न तु सर्वकारीयकोषात्।

## स्वास्थ्यमन्त्रिणः भ्रमणम् अद्यापि नानुमोदितम्

मुख्यमन्त्री उक्तवान् यत् स्वास्थ्यमन्त्रिणः धनीरामशण्डिलस्य भ्रमणस्य अद्यापि अनुमोदनं न कृतम्। सामाजिकमाध्यमेषु एकं पत्रं प्रसृत अभवत्। जनसमूहः अवगन्तुम् अर्हति यत् विधायकाः अथवा अधिकारिणः प्रायः एक्स्पोजर- भ्रमणार्थं आधिकारिक-भ्रमणेषु गच्छन्ति, परन्तु एतद् भ्रमणं प्रायः सर्वकारीय-वित्तपोषणेन सह सम्बद्धानि भवन्ति, यद्यपि विविध-परियोजनानां कृते १० प्रतिशतं धनं अस्य प्रयोजनाय उपयुज्यते।

## काङ्गड़ाबैङ्कप्रकरणस्य पूर्णतथ्यानि प्रकाशितानि भविष्यन्ति

काङ्गड़ासहकारीवित्तकोषे विगतसप्ताष्टवर्षेभ्यः स्थितिः यदा प्रकाशं प्राप्ता तदा बोर्डस्य विघटनं जातम्। जनाः लघु-लघु-वस्तूनाम् एकैकं ४० कोटिरूप्यकाणां ऋणं गृह्णन्ति। ते ऋणं न परिशोधयन्ति, ४ कोटिरूप्यकाणां मूल्यं दापयन्ति। निस्तारणं तु निर्धनकृषकाणां कृते भवेत्। एकसमयनिस्तारणाय यः अग्रे आगच्छति सः तत् प्राप्स्यति। ईडी काङ्गड़ासहकारीबैङ्कप्रकरणस्य अन्वेषणं कुर्वन् अस्ति। तथ्यं प्रकाशितं भविष्यति।

# प्रधानमन्त्री नरेन्द्रमोदी देशं प्रगतेः नूतनयुगं प्रति मार्गदर्शनं कृतवान्- विपिनपरमारः



**हिमसंस्कृतवार्ताः- काङ्गड़ा।** काङ्गड़ामण्डलस्य शाहपुरविधानसभाक्षेत्रे आयोजिते समागमे सभां सम्बोधयन् पूर्वविधानसभाध्यक्षः विधायकः च विपिनसिंहपरमारः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी देशं नूतनयुगं प्रति नेतवान्। सः अवदत् यत् एककरम् इत्यादयः ऐतिहासिकाः निर्णयाः भारतं आर्थिकशक्तिं कर्तुं आधारभूताः सिद्धाः भविष्यन्ति। संगोष्ठ्यां जीएसटी- दरेषु न्यूनीकरणस्य, नूतनानां दराणां विषये च विस्तरेण चर्चा कृता। एतेन सर्वेषां, सामान्यजनस्य, व्यापारिणाम्, उद्योगस्य च लाभः भविष्यति इति परमारः अवदत्। एतेन न केवलं आर्थिकवृद्धिः त्वरिता भविष्यति अपि तु लघुव्यापाराणां कृते अवसरद्वाराणि अपि उद्घाटितानि भविष्यन्ति। परमारः अवदत् यत् मोदी इत्यस्य दृष्टिः अद्वितीया अस्ति, यत् सः प्रत्येकं अवसरे दरिद्राणां दुःखं अवगच्छेत्। एकं राष्ट्रं, एकं करं युगं परिवर्तयिष्यति, भारतं विश्वे अग्रणी भविष्यति।
प्रधानमन्त्रिणं मोदिनं प्रति कृतज्ञतां प्रकटयन् सः अवदत् यत् तस्य नेतृत्वे भारतं विश्वनेतृत्वस्य दिशि तीव्रगत्या प्रगतिशीलः अस्ति। आयोजने उपस्थिताः अपि प्रधानमन्त्रिणः मोदिनः पदस्य स्वागतं कृतवन्तः, भविष्ये देशस्य अर्थव्यवस्था अधिका सुदृढा भविष्यति, समाजस्य प्रत्येकं वर्गं लाभं प्राप्स्यति इति विश्वासं प्रकटितवन्तः। समागमे "एकं राष्ट्रं, एकं करम्, प्रत्येकं गृहं विकासं प्रति गच्छति" इति घोषः प्रतिध्वनितः। अस्मिन्नवसरे पूर्व मंत्री सरवीण चौधरी, मंडलाध्यक्ष रविदत्तशर्मा, अशोक वशिष्ठः, जिलाकांगड़ा- भाजपा महासचिवः देवेन्द्रः कोहली अन्ये च नेतारः कार्यकर्तारः उपस्थिता अभवन्।

# हिमाचलप्रदेशे २ अक्तूबर दिनाङ्के रात्रौ ८ वादनात् १०८ तथा १०२ एम्बुलेन्ससेवाः स्थगिताः भविष्यन्ति

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे २ अक्तूबर दिनाङ्के रात्रौ ८वादनात् १०८ तथा १०२ एम्बुलेन्ससेवाः स्थगिताः भविष्यन्ति। यदि तेषां आग्रहाः न पूर्यन्ते तर्हि कर्मचारिभिः कार्यस्थगनं कर्तुं निर्णयः कृतः अस्ति। इदम् कार्यस्थगनं अक्टोबर्-मासस्य तृतीये दिने रात्रौ ८ वादनपर्यन्तं भविष्यति। फलतः सामान्यजनाः २४ होरापर्यन्तं एम्बुलेन्ससेवाभ्यः वंचिताः भविष्यन्ति। अस्मिन् काले एम्बुलेन्सकर्मचारिणः उपायुक्तकार्यालयस्य बहिः विरोधप्रदर्शनं करिष्यन्ति। १०८ तथा १०२ एम्बुलेन्सकर्मचारिसङ्घः (सीआईटीयू-सम्बद्धः) राष्ट्रियस्वास्थ्यमिशनस्य (एनएचएम) नीतीनां विरुद्धं एतत् आन्दोलनं कर्तुं निर्णयं कृतवान् अस्ति। एनएचएम- अन्तर्गतं कार्यं कुर्वन्तः कर्मचारिणः शोषणस्य सम्मुखीकरणं कुर्वन्ति इति सीआईटीयू-अध्यक्षः विजेन्द्रमेहरा अवदत्। तेषां कृते सर्वकारेण निर्धारितं न्यूनतमं वेतनमपि न प्राप्यते, १२ होराः कार्यं कृत्वा अपि अतिरिक्तसमयः न दीयते। उच्चन्यायालयस्य, श्रमन्यायालयस्य, सीजीएम न्यायालयस्य शिमला, श्रमकार्यालयस्य च आदेशानाम् अभावेऽपि कर्मचारिणां शोषणं निरन्तरं वर्तते। संघनेतारः स्थानान्तरणस्य सम्मुखीकरणं कुर्वन्ति वा मानसिक-उत्पीडनस्य कारणेन स्वकार्यं त्यक्तुं बाध्यन्ते वा। ईपीएफ, ईएसआई इत्येतयोः कार्यान्वयनयोः अपि गम्भीराः दोषाः सन्ति। अनेन कर्मचारिणां मूलवेतनस्य न्यूनता, श्रमविधानानां उल्लङ्घनं च भवति।
यदि समये सर्वकारः आग्रहेषु सकारात्मकं कार्यं न करोति तर्हि आन्दोलनं तीव्रं भविष्यति इति संघेन सचेतना दत्ता। एम्बुलेन्ससेवाः सामान्यजनजीवनेन सह सम्बद्धाः सन्ति, अतः सर्वकारेण संवेदनशीलः भूत्वा शीघ्रमेव समाधानं अन्वेष्टव्यम्। मेहरा उक्तवान् यत् एनएचएम-कर्मचारिभ्यः १२ होराः कार्याणि स्वीक्रियन्ते, ८ होराणाम् अपि वेतनं न दीयते। एनएचएम हिमाचल-उच्चन्यायालयस्य आदेशानां श्रमनियमानां च अवहेनां करोति।

# स्नातकोत्तरपाठ्यक्रमं सम्पन्नं कृत्वा पञ्च विशेषज्ञवैद्याः चिकित्सालयेषु नियुक्ताः


हिमसंस्कृतवार्ताः- शिमला। श्रीलालबहादुरशास्त्री-चिकित्सा -महाविद्यालये नेरचौके स्नातकोत्तर-पाठ्यक्रमं सम्पन्नं कृत्वा पञ्च विशेषज्ञवैद्याः विभिन्नेषु चिकित्सालयेषु नियुक्ताः सन्ति। अस्य विषये अधिसूचना प्रकाशिता अस्ति। यत्र चिकित्साधिकारी (एमओ ओबीजी) डॉ. प्रियंका भारती चिकित्साधिकारी (बालरोगः) डॉ. नमन राजेशशर्मा च नागरिकचिकित्सालये चौपाले नियुक्तौ। डॉ. श्रुति भाटिया, एमडी (चिकित्सा), डॉ. शालिनी, एमडी (चिकित्सा) च सुपरस्पेशलिटी-चिकित्सालये चमियाणा इत्यत्र नियुक्ते। चिकित्साधिकारी (एनेस्थेसिया) डॉ. प्रसाद पीबी नागरिकचिकित्सालये जोगिन्दरनगरे नियुक्तः। तदतिरिक्तं डॉ. जसदीपसिंहः ब्राड़ः, चिकित्साधिकारी चण्डीगढस्य पीजीआईतः त्यागपत्रं दत्त्वा नागरिकचिकित्सालये मारकण्ड इत्यत्र नियुक्तः अस्ति।

# इतिहासविभागस्य विद्यार्थिनः मंडीजनपदस्य बरसेलेतः पंचवक्त्रपर्यन्तं धरोहर- अध्ययनयात्रा



**हिमसंस्कृतवार्ताः-** सरदारवल्लभभाईपटेलस्य 150तमायां जयन्त्यवसरे सरदारपटेल-विश्वविद्यालयस्य मंडी इत्यस्य इतिहासविभागस्य भारतीय- सांस्कृतिक- निधिः मण्डी चेप्टर इत्यस्य संयुक्ततत्त्वावधाने मंगलवासरे विरासत- अध्ययनयात्रायाः आयोजनं कृतम्। अस्य आयोजनस्य उद्देश्यं मंडीनगरस्य समृद्ध-सांस्कृतिक- धरोहरस्य, ऐतिहासिकमहत्त्वस्य अवगमनं वर्तते। कार्यक्रमस्य मुख्यातिथिः विश्वविद्यालयस्य कुलगुरुः आचार्यः ललितकुमार अवस्थी आसीत्। स्वसंबोधने सः उक्तवान् यत् एतादृशाः कार्यक्रमाः छात्राणां शैक्षणिक-सांस्कृतिकदृष्टिकोणस्य कृते महत्त्वपूर्णाः सन्ति। मंडीनगरस्य ऐतिहासिकधरोहरं संरक्षणम् आवश्यकमस्ति। कार्यक्रमस्य अध्यक्षता नरेश मल्होत्रा, समन्वयकः भारतीय- सांस्कृतिक- निधिः (इंटेक) मण्डी चेप्टर अकरोत्। सः मंडीनगरस्य ऐतिहासिक भवनानां, मंदिराणां च संरक्षणाय समाजस्य युवावर्गस्य सक्रियसहभागिता अनिवार्या इति उक्तवान्। अवसरेऽस्मिन् मुख्यवक्तारूपेण अनिलशर्मा लेखकः, जिला ब्यूरोप्रमुखश्च अनंतज्ञानसमाचारपत्रं, मंडी, मंडीजनपदस्य सांस्कृतिकधरोहरस्य स्थापत्यकलायाः महत्त्वे विस्तृतव्याख्यानं प्रस्तुतवान्। अनिलशर्मा सह-समन्वयकः, भारतीय- सांस्कृतिकनिधिः (इंटेक) मण्डी चेप्टर अकथयत् यत् एतादृशाः अध्ययनयात्राः न केवलं छात्राणां कृते अधिगमस्य अवसरं प्रददाति अपि तु निजसांस्कृतिकधरोहरं प्रति गर्वस्य, संरक्षणस्य भावनामपि जनयति। कार्यक्रमस्य सफलसंयोजनं डॉ. राकेशकुमारशर्मा विभागाध्यक्षः इतिहासविभागः, सरदारपटेलविश्वविद्यालयः, मंडी अकरोत्। अस्मिन् अवसरे सः उक्तवान् यत् धरोहर-अध्ययनयात्रावसरे विद्यार्थिनः, शोधार्थिनश्च मंडीनगरस्य प्रमुखऐतिहासिकस्थलानां भ्रमणं कृतवन्तः। यत्र बरसेले, बिज्जै वरिष्ठ- माध्यमिक- पाठशालायाः ऐतिहासिकभवनं, प्रसिद्धं पंचवक्त्रमहादेवमंदिरञ्च विशेषरूपेण सम्मिलितमासीत्। अस्मिन् अवसरे इंटेक इत्यस्य समन्वयकः नरेश मल्होत्रा, सह समन्वयकः अनिलशर्मा, जयश्री कपूरः प्राचार्यः बिज्जे राजकीय-वरिष्ठ- माध्यमिक- पाठशाला मंडी, अजयसहगलः, राजीवकुमारः, सहायक- आचार्यः राजेशशर्मा, कृष्णकुमारः, शोधार्थी डोल्मा, राजू, सूर्यप्रकाशः, इतिहाससोसायटी अध्यक्ष सानूकुमारः, मीडियाक्लब अध्यक्षः दीपक दीपांशुः, युवराजः, स्मृतिः, आंशिकः, डिम्पल कुमारी, लखविंदरः, भूपेंदरः, विद्यार्थिनः, स्थानीयनागरिकाश्च उपस्थिताः आसन्। अन्ते सांस्कृतिकविरासतसंरक्षणस्य, संवर्धनस्य च सामूहिकप्रतिज्ञा अभवत्।

# ओडिशाप्रदेशे ३ वर्षेषु २२०० गोदावरीशमिश्रनाम्ना आदर्शविद्यालयाः भवीष्यन्ति



**हिमसंस्कृतवार्ताः- शास्त्री अधरः, उत्कलप्रदेशः।** प्राथमिकशिक्षायाः गुणवत्तावर्धनं भविष्यति। राष्ट्रियशिक्षानीतेः कार्यान्वयनानन्तरं राज्यसर्वकारः प्राथमिकस्तरतः राज्यस्य बालकानां अधिकसशक्तीकरणाय प्रत्येकस्मिन् पंचायते गोदावरीशमिश्रनाम्नादर्शविद्यालयम् उद्घाटयिष्यति। प्रथमचरणस्य आगामिषु ३ वर्षेषु २२०० आदर्शविद्यालयाः उद्घाटिताः भविष्यन्ति। एतत् राज्यमन्त्रिमण्डलेन अनुमोदितम् अस्ति।मुख्यमन्त्री मोहनचरणमाझीमहोदयः अवदत् यत् गोदावरीश आदर्शविद्यालययोजनायाः उद्देश्यं शिक्षाधिकारकानूनस्य अनुपालनेन गुणवत्तापूर्णशिक्षाप्रदानम् अस्ति।

अयं आदर्शविद्यालयः राष्ट्रियशिक्षानीतेः उद्देश्यं पूरयिष्यति। एतेन बालकाः सामाजिकतया शैक्षिकतया च सशक्ताः भविष्यन्ति। प्रथमचरणस्य त्रयः वर्षाणि (२०२५-२६ तः २०२७-२८ पर्यन्तं) कालखण्डे २२०० आदर्शविद्यालयाः स्थापिताः भविष्यन्ति।

# जौनपुर-जनपदे सितम्बर-मासीय सरलसंस्कृतसम्भाषण शिविरस्य समापनं जातम्




**हिमसंस्कृतवार्ताः।** जौनपुर-जनपदे सितम्बर-मासीय द्वादश-दिवसीय सरलसंस्कृतसम्भाषणशिविरस्य समापनं जातम्। उत्तरप्रदेशसंस्कृतसंस्थान-लखनऊ द्वारा संचालितस्य "गृहे गृहे संस्कृतम्" योजनायाः अन्तर्गतं जौनपुर-जनपदस्य करञ्जाकलायाम् कलीचाबादस्य प्राथमिकविद्यालये अष्टादश दिनाङ्कतः प्रचलितं द्वादश-दिवसीय सरलसंस्कृतसम्भाषणशिविरस्य समापनम् अद्य अभवत्।विद्यालयस्य प्राचार्यः मो.शादः दीपं प्रज्वलितवान्, वाग्देवी सरस्वत्याः प्रतिमायाः माल्यार्पणं रीना महोदया कृतवती।विद्यालयस्य छात्राः "संस्कृतगीतानि, वस्तु परिचयः, संख्या गीतम्, सप्त ककाराः, बाल गीतानि" च एतेषां प्रस्तुतयः दत्तवन्तः। संस्थानस्य प्रशिक्षिका पूनम सिंह, विद्यालयस्य प्रधानाचार्यः, शिक्षिक, शिक्षिकाः, छात्रान् च एतेषां धन्यवादाः दत्तवती।शिविरस्य समापनं कल्याणमन्त्रेण अभवत्।अस्मिन् अवसरे विद्यालयस्य प्रधानाचार्यः, शिक्षिकाः रागिनी यादवः, रीना महोदया, फातिमा महोदया, सुष्मिता यादवः महोदया, शिक्षा मित्र लीलावती महोदया, शिक्षकः सत्यप्रकाश चौहानः, जयशंकर श्रीवास्तवः, छात्राः च उपस्थिताः आसन्।

# बिहारराज्यस्य डीएवीपब्लिकस्कूलबरारी भागलपुर विद्यालये नवरात्रमभिलक्ष्य सांस्कृतिककार्यक्रमाः आयोजिताः




हिमसंस्कृतवार्ताः। बिहारराज्यस्य डीएवीपब्लिकस्कूलबरारी भागलपुरविद्यालये नवरात्रमभिलक्ष्य सांस्कृतिककार्यक्रमानाम् आयोजनम् अभवत् । अस्मिन् कार्यक्रमे बालकाः बालिकाश्च उत्साहपूर्णं भाषणं काव्यपाठं च अकुर्वन्, अपि च "अयि गिरिनन्दिनि" स्तोत्रस्य मधुरं गानं च प्रस्तुतवन्तः।विद्यालयस्य संस्कृत-अध्यापकः डॉ. विमलेश झामहाशयः नवरात्रमहत्त्वं प्रकाशयन् अवदत् यत् अयं उत्सवः असत्ये सत्यस्य, अधर्मे धर्मस्य, अन्यायेषु न्यायस्य च विजयः इति सूचयति। ते दुर्गासप्तशत्याः "गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम्।मया त्वयि हतेत्रैव गर्जिन्त्याशु: देवताःइति श्लोकं उद्धृत्य देव्याः शक्तिं पराक्रमं च विषये छात्रान् अकथयत्।विद्यालयस्य प्राचार्यः सह सहायक-क्षेत्रीय-अधिकारी श्री अनिल कुमारमहोदयाः स्वसम्बोधने सामाजिकसांस्कृतिकयोः कृते नवरात्रस्य महत्त्वं प्रतिपादयन्तः देव्याः आराधनया सर्वान् प्रेरणां गृहीतुं प्रोत्साहितवन्तः। सर्वे कार्यक्रमाः विद्यालयपरिसरे अत्यन्तं गरिमामयवातावरणे सफलतया सम्पन्नः अभवन्। कार्यक्रमस्य सफलसंचालनाय श्री आशीष कुमार दास, श्री अभिनव कुमार आदिशिक्षकानां भूमिका प्रशंसनीया आसीत्।

# "आयुर्वेदेन निरामयजीवनम्"इति शीर्षकमुपेत्य वेदविभागेन एकदिवसीया सङ्गोष्ठी समायोजिता





**हिमसंस्कृतवार्ताः - डॉ आलोकः कटनी,मध्यप्रदेशः ।** आश्विन-शुक्ल-सप्तमी तिथौ एकोनत्रिंशत् सितम्बर 2025 तमे दिनाङ्के सोमवासरे आयुर्वेददिवसोपलक्ष्ये महर्षिमहेशयोगी वैदिकविश्वविद्यालये ब्रह्मस्थाने (भारतस्य भौगोलिककेन्द्रबिन्दौ- करौन्दी, कटनी,मध्यप्रदेशे "वेदविभागेन" "आयुर्वेदद्वारा निरामयजीवनम्" इति विषये "एकदिवसीया व्याख्यानसङ्गोष्ठी कार्यक्रमसंरक्षक-आचार्य प्रमोदकुमारवर्मणः (कुलगुरुः, म. म.यो. वै. वि, म.प्र) मार्गदर्शनेन विश्वविद्यालयस्य सभागारे सफलतया समायोजिता ।अमुष्मिन् शुभावसरे सभायां ध्यानसिद्धिशिक्षकः माननीयगिरजाशंकरचौधरीमहोदय अध्यक्षः, मुख्यवक्तारूपेण डॉ सुन्दरराजपेरुमलमहोदयः (एम.डी आयुर्वेद,एमएससी मनोविज्ञानी, निदेशक,आरोग्यधात्री-आयुर्वेद-अनुसंधान-संस्थानम्,विशाखापट्टणम्) तथा सारस्वतवक्तारूपेण डॉ सत्यव्रतनन्दमहोदयः (अनुसन्धानसहायकः,राष्ट्रीयभारतीयायुर्विज्ञान सम्पदा-संस्थानम्,हैदराबाद), "सर्वकार उ.मा. विद्यालय" गाँधीग्रामः, बुढ्ढागरम्,जाबलिपुरस्य आचार्याः श्रीमान् राकेशचौरसिया , प्रदीपदीक्षितः, देवीदासवर्मनमहोदयाः च मञ्चासीनाः आसन्। सर्वादौ स्वतन्त्र-द्विवेदीमहोदयेन गुरूपूजनं, डॉ चन्द्रशेखरमिश्रमहोदयेन च वैदिक-मंगलाचरणमकरोत्। तदनु डॉ आलोकचन्द्र परिडामहोदयेन अतिथीनां स्वागतपरिचयञ्च कृतम्। पश्चात् डॉ नित्येश्वरचतुर्वेदीवर्येण कार्यक्रमस्य प्रस्ताविकमपठत्। मुख्यवक्त्रा डॉ सुन्दरराजपेरुमलमहोदयेन पंचकर्म, स्वस्थवृत्त, चिकित्सा इत्यादिभि आयुर्वेदगतविविधायामैः स्वीयसुदीर्घानुभवेन शास्त्रविधिना पी.पी.टी माध्यमेन च विस्तृतव्याख्यानम् अकरोत्। सारस्वतवक्ता डॉसत्यव्रतनन्दमहोदयः आयुर्वेदस्य अर्थव्युत्पत्तिसहितम् "आरोग्यं भास्करादिच्छेत्" इत्युक्त्या यजुर्वेदाधारितसूर्यतत्त्वम् आलोच्य निरामयजीवनम् अप्रकाशयत्। तदुपरान्ते ध्यानसिद्धिशिक्षकमाननीयगिरजाशंकरचौधरीमहोदयेन स्वीयाध्यक्षीयोद्बोधने महर्षिमहेशयोगिकृत-आयुर्वेदाधारितानुसन्धानकार्यस्य विषये, विविधआयुर्वेदशोधसंस्थानां विषये च सूचनाः प्रादात्। तदनन्तरं डॉ. आलोकचन्द्रपरिडावर्यः प्रत्यक्षाप्रत्यक्षतयासम्मिलितानां सर्वेषामतिथीनां प्रतिभागीनां च कृते कृतज्ञतां न्यवेदयत्। कार्यक्रमस्य संचालनं सुचारूतया डॉ. नेहामिश्रवर्यया कृतम्। अस्याः संगोष्ठ्याः समन्वयकः डॉ. के.के. त्रिपाठी (विशेषकर्तव्य अधिकारी), संयोजकः डॉ. आलोकचन्द्रपरिडा(सहा.प्राध्यापकः वेदविभागाध्यक्षश्च), सहसंयोजकः डॉ.नित्येश्वरचतुर्वेदी, डॉ.चन्द्रशेखरमिश्रः, डॉ.नेहा मिश्रा, तथा तकनीकीसहायकः श्रीसीमांतशर्मावर्येण च आसन्। अस्यां सङ्गोष्ठ्यां विश्वविद्यालयस्य सर्वेपि संकायप्रमुखाः,विभागाध्यक्षाः,आमन्त्रितविद्वान्सः,छात्राश्च सक्रियरूपेण भागं गृहीतवन्तः। सर्वेषां सहकारेण इयं संगोष्ठी सफलतया सुसम्पन्ना। संगोष्ठीयं अतीव सूचनाप्रदा प्रेरणादायिनी च आसीत्, अस्यां संगोष्ठ्यां प्रत्यक्षरूपेण आभासीयमाध्यमेन च आहत्य सप्ततिः ७० प्रतिभागिनः समुपस्थिताः आसन् इति शम्।

## स्वागतं तत्रभवतां युवराजवाणी-वार्त्ताप्रसारणे

### भारतस्य परमाणुपराक्रमः : Dead Hand प्रणाल्या कम्पितः चीनदेशः

Agni-5 तः Dead Hand यावत् भारतस्य द्वितीयप्रहारक्षमता विस्मापयति विश्वम्! भारतस्य गोपनीयशक्ति : एकेनैव प्रहारेण विलोपं यास्यति शत्रुदेशस्य अस्तित्वम्!South China Morning Post इत्यस्य प्रबलकथनम् : भारतस्य Dead Hand क्षमता अकल्पनीया! चीनस्य प्रबलप्रकथनम् : भारतस्य 'Dead Hand' इति शस्त्रास्त्रव्यवस्था विश्वनेत्रैः निगूढम्, किंतु भारतस्य तेजसा सर्वं विश्वं विस्मितम्! चीनस्य South China Morning Post इत्यनेन पत्रेण विस्मयकरं प्रतिपादनं कृतम् अस्ति यत् भारतेन परमाण्वस्त्र-क्षेत्रे अतिशयदृढतरा SSA (Second Strike Assurance) इत्याख्या आयुधप्रतीकारव्यवस्था विकसिता वर्तते — अथ चैषा व्यवस्था विश्वतः निगूह्य अपि भारतस्य पराक्रमं प्रतिपादयति।विवरणस्य अनुसारेण भारतस्य उपरि यदि कियदपि विकटतरं परमाण्वाक्रमणं भवति चेत्, तथापि भारतस्य द्वितीयप्रहारशक्तिः (Second Strike Capability) इत्थं प्रचण्डा भविष्यति यत् पाकिस्तानसन्निभस्य राष्ट्रस्य अस्तित्वमेव केवलमेकेन शस्त्रेण लोपं यातुं शक्ष्यति।

# नारदभक्तिसूत्रम्



नारदभक्तिसूत्रमिति देवर्षिनारदकृतः ८४ सूत्रेषु निबद्धः भक्तिशास्त्रविषयः अनन्यसाधारणो ग्रन्थः। यद्यपि एषः सूत्रमयः ग्रन्थः तथापि सूत्रग्रन्थेषु सर्वत्र दृश्यमाना सङ्कीर्णता, दुर्बोधता च अस्मिन् ग्रन्थे कुत्रापि नास्ति। हृद्यशैल्या भक्तिशास्त्रस्य आधारभूताः विषयाः, भक्तेः भक्तस्य च स्वरूपम् अस्मिन् विशदतया सरलतया वर्णितम्। अतः भक्तिसाधकानां कृते एतस्य महत्त्वम् अतुल्यं वर्तते। एतस्य ग्रन्थस्य सूत्राणां पुनः किञ्चित् अधिकं सारल्यं सम्पाद्य सूत्रशैल्याः न्यूनताः अपाकृत्य सरलगद्ये लिखितः एतस्य सारः जिज्ञासूनां कृते अधिकमेव लाभाय भवेत् इति धिया एषः लेखनप्रयत्नः।

### अनुबन्धचतुष्टयम्-

अस्य शास्त्रस्य विषयो भक्तिविवेचनम्। ईश्वरे तदनुग्रहशक्तौ वा विश्वसन्तः भक्तीच्छवः अस्मिन् भक्तिशास्त्रे अधिकारिणः। न तत्र जातिविद्यारूपकुलधनक्रियादिभेदाः विचार्यन्ते इति नारदः। ईश्वरोऽपि तथा–अपि चेत्सुदुराचारो भजते मामनन्यभाक्।साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः।। क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति।।

**ग्रन्थविषययोः** प्रतिपाद्यप्रतिपादकरूपः सम्बन्धः। प्रतिपाद्या भक्तिः ग्रन्थश्च प्रतिपादकः। शास्त्रस्यास्य प्रयोजनं भक्तिलाभः। इति अनुबन्धचतुष्टयम्।

**-अभिजित् तोडकर**

**।।ॐ।।**

**"वन्दे संस्कृतमातरम्"**

**"लौकिकन्यायकोशः"**

**"निर्धनमनोरथन्यायः"**

निर्धनानां धनाभावेऽपि मनोरथाः {कामनाः} बहुविधा भवन्ति इति अस्य भावः। ते मनोरथाः विफलाश्च भवन्ति खलु। एवं विफलानां विषये अस्य न्यायस्य प्रयोगो भवति।

"उन्नम्योन्नम्य तत्रैव निर्धनानां मनोरथाः।

**हृदयेष्वेव लीयन्ते विधवास्त्रीस्तनाविव।।**

(लौकिकन्यायसाहस्रीतः)

**-डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**

# अध्येता इत्यस्य वार्ता-संवादः




**नन्दिनी-** नमो वः। अद्यतने 'अध्येता' इत्यस्य वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमो नमः नन्दिनि! आवयोः संवादः सदैव रोचकः भवति। पूर्वे भारतीयानां क्रिकेट-विजयः स्मृतः। अद्य का नूतना वार्ता श्रूयते?

**नन्दिनी-** आम् काव्ये! भवत्याः वचनं सत्यं यत् राजनैतिकविवादाः आगच्छन्ति गच्छन्ति च। परम् अद्य द्वितीया वार्ता अस्ति यत् पुञ्छ-प्रदेशे सैन्य-कर्मचारिणः अकस्मात् ग्रेनेड-विस्फोटेन प्राणान् त्यक्तवान् अभूत्। तस्य मृत्युः दुःखदः।

**काव्या-** इदं वृत्तं श्रुत्वा मनसि पीडा सञ्जाता। सैनिकस्य जीवने एतादृशः त्यागः करुणः। परं तृतीया वार्ता का?

**नन्दिनी-** सत्यम् उक्तं, काव्ये! वीरस्य बलिदानं तु हृदयभेदकम्। परम् अद्य तृतीया वार्ता अस्ति यत् केन्द्रीय-मन्त्री पीयूष-गोयल-महोदयः 'अरट्टै' नामके स्वदेशी-सन्देश-मञ्चे प्रविष्टः। अयं नूतन-प्रयोगः भारतस्य आत्मनिर्भरतायाः प्रतीकः।

**काव्या-** आम् नन्दिनि! एतत् श्रुत्वा आनन्दः जातः। स्वदेशी-तन्त्रज्ञानस्य उपयोगः प्रशंसनीयः। चतुर्थी वार्ता का अस्ति?

**नन्दिनी-** सत्यम् उक्तं, काव्ये! स्वदेशी-तन्त्रज्ञानस्य प्रगतिः गौरवस्य विषयः अस्ति। परम् अद्य चतुर्थी वार्ता अस्ति यत् कश्चित् वरिष्ठः रष्या-राजदूतः उक्तवान् अभूत् यत् ब्रम्होस-क्षेपणास्त्रस्य उन्नयनाय असीमितं सामर्थ्यम् अस्ति।

**काव्या-** एतत् सामर्थ्यं भारतस्य रक्षायै महत्त्वपूर्णम्। ब्रम्होस-क्षेपणास्त्रस्य उन्नयनस्य वार्ता श्रुत्वा, भारतस्य गर्वः वर्धितः। अद्य एताः चतस्रः वार्ताः श्रुताः। नन्दिनि, भवत्या सह संवादः ज्ञानवर्धकः अभूत्। धन्यवादाः।